# संस्कृत-वार्ता:

दिनाङ्कः-07.10.2023 सायं : 06:20

## मुख्यवार्ता

- भारतेन एशियाई-क्रीडासु महिला-कबड्डीति प्रतिस्पर्धायां विजयेन सह सप्ताधिकैकशतं पदकानां महत्वपूर्णा उपलब्धिः समर्जिता।
- प्रधानमन्त्री नरेन्द्रमोदी एशियाई-क्रीडासु शतपदकानां समुपलब्धौ भारतीय-क्रीडकेभ्य: वर्धापनानि प्रदत्तवान्। मंगलवासरे च क्रीडकै: सह मेलनं करिष्यति।
- द्विपञ्चाशततमं वस्तु-सेवा-ऋण-उपवेशनम् अद्य नवदिल्ल्यां समायोजितम्।
- गृहमन्त्री अमितशाह: उत्तराखण्डस्य टिहरी-जनपदे अद्य केन्द्रीय-क्षेत्रीय-परिषद: अध्यक्षतां कृतवान।
- इजराइलदेशेन युद्धसादृशी स्थिति: घोषणा विहिता हमास-आक्रमणान्नतरं।
- आई सी सी इति पुरूषस्य क्रिकेट-विश्व-चषक-प्रतिस्पर्धायां अद्य धर्मशालायां बांग्लादेशेन-अफगानिस्तानदेश: षड्-धावनांकै: पराजित:।

## एशियाई प्रतिस्पर्धा

एशियाई-क्रीडासु भारतेन चीनस्य हांगचोउनगरे साम्प्रतं यावत् सप्ताधिकैकशतं पदकानि विजितानि। पदकेषु अष्टाविंशतिः स्वर्णपदकानि, अष्टत्रिंशत् रजतपदकानि, एकचत्वारिंशत कांस्यपदकानि सन्ति। इदं प्रथमवारं अस्ति यदा भारतेन एतादृशं कीर्तिमानं संस्थापितम्। अवधेयं वर्तते यत् इदं केवलं द्वितीय वारमस्ति यत् यदा भारतं त्रिसृषु प्रमुखक्रीडासु ओलम्पिक-राष्ट्रमण्डल-एशियाई-क्रीडासु शताधिकानि पद्कानि विजितानि। दशाधिक द्विसहस्रतमे वर्षे नवदिल्ल्यां जातायां राष्ट्रमण्डल क्रीडायां एकाधिकैकशतं पदकानि विजितानि आसीत्। नवीनं स्वर्णपदकं पुरूषस्य कब्डीति-प्रतिस्पर्धात: आगतम्। यत्र भारतीय-दलेन ईरानदेशं त्रयस्त्रिंशत्-नवविंशति अंकै: पराजितम्।

## राष्ट्रपतिपदासीना द्रौपदीमुर्मु:

राष्ट्रपतिपदासीना द्रौपदीमुर्मु: प्रधानमन्त्री च नरेन्द्रमोदी चीनस्य हांगचोउनगरे नवदशतमायां एशियाई क्रीडासु शतपदकानां समुपलब्धौ भारतीयदलाय शुभकामना: प्रदत्तवन्तौ। राष्ट्रपतिना प्रोक्तं यत् प्रथमवारं शतपदकानि विजित्य भारतेन एतिह्यं रचितम्। अनया कथितं यत् क्रीडका: तत्र स्वीयानि-समर्पण-कौशल-चरित्राणि च प्रदर्शितानि। प्रत्येकस्मिन् क्रीडके राष्ट्रं गौरवम् अनुभवति। अत्रावसरे प्रधानमन्त्री अवदत् यत् इयं भारताय महत्वपूर्णा उपलब्धि: वर्तते। असौ कथितवान् यत्-भारतीया: उत्सुका: सन्ति यत् अस्माभि: शतं पदकानि विजितानि। श्रीमोदी तेभ्य: क्रीडकेभ्य: हार्दा: शुभकामना: प्रदत्तवान् येषां प्रयासै: भारतेन इयं उपलब्धि: अधिगता। अनेन आश्चर्येण प्रदर्शनेन ऐतिह्यं विरचितम्। हृदयं गौरवेण परिपूरितं जातम्। प्रधानमन्त्री कथितवान् यत् असौ मंगलवासरे एशियाई-क्रीडनां दलस्य आतिथ्यं करै: क्रीडकै: च समं वार्ताकर्तुम् उत्सुको वर्तते। क्रीडामन्त्री अनुरागसिंह ठाकुर: अपि भारतीय-क्रीडकैभ्य: तेषाम् उपलब्धौ वर्धापनानि प्रदत्तवान्। नवदिल्ल्यां वार्ताहरै: समं वार्तां साधयन् असौ अकथयत् यत् ते भविष्यस्य क्रीडकेभ्य: प्रेरणां प्रददति। एशियाई-क्रीडका: द्विसप्तति: वर्षाणाम् इतिहासे इतिहासे अनेकानि कीत्तिमानानि विच्छेदितवान्। नवीनं कीर्तिमानं च संस्थापितवान्।

## वस्तुसेवा ऋण-उपवेशनम्

केन्द्रीय वित्तमन्त्रिण: निर्मलासीतारमणस्य अध्यक्षतायाम् अद्य नवदिल्ल्याम् द्विपञ्चाश-मस्य वस्तु-मस्य वस्तु-सेवा-ऋण-परिषद: उपवेशनम् आयोजितम्। एतस्मिन् उपवेशने केन्द्रीयवित्तराज्यमन्त्रिणा

केन्द्रीयवित्तराज्यमन्त्रिणा पंकजचौधरी इत्यनेन सह राज्यानां केन्द्रशासित-प्रदेशानां च वित्तमन्त्रिण: वित्तमन्त्रिण: भागं अभजन्। परिषद: उपवेशनान्तरं वार्ताहरान् सम्बोधयन्ती वित्तमन्त्री कथितवती कथितवती यत् वस्तु-सेवा-ऋण-साग्रह-आवेदन-न्यायाधिकरणं प्रियङ्गु गुड-इत्यनयो: जीएसटी-इत्यनेन सम्बद्ध-अनेके-महत्वपूर्ण-निर्णया: निर्णीता:। अनया कथितं यत् गुडवस्तूनि पञ्चविंशति प्रतिशतं पञ्चविंशति प्रतिशतं सम्प्रति अपचीय पञ्चप्रतिशतं जातम् येन ईक्षुकृषकेभ्य: लाभ: मेलिष्यति। मेलिष्यति। आग्रहावेदन-न्यायाधिकरण-सम्बन्धे संशोधन विषये अनया प्रोदीरितं यत् अध्यक्षस्य अध्यक्षस्य अध्यक्षस्य न्यूनतामायु: सम्प्रति सप्ततिवर्ष: जात:। सदस्यानां च आयुसीमा सप्तषस्टि: जाता। जाता।

----

## अमितशाह:

गृहमन्त्री अमितशा: अद्य उत्तराखण्डस्य नरेन्द्रनगरे-केन्द्रीय-क्षेत्रीय परिषद: चतुर्विंशतितमस्य उपवेशनस्य अध्यक्षतां कृतवान्। उपवेशनस्य उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथ: मध्यप्रदेशस्य मुख्यमन्त्री शिवराज सिंह चौहान: छत्तीसगस्य मुख्यमन्त्री भूपेशबघेल: उत्तराखण्डस्य च मुख्यमन्त्री पुष्करसिंह धामी: भागं गृहीवन्त: गृहमन्त्री अद्यैव च देहरादूननगरे वन-अनुसन्धान-संस्थाने नवचत्वारिंश त्तमे अखिलभारतीय-आरक्षि-विज्ञान-कांग्रेस इत्यस्मिन् सम्मिलितो भविष्यति।

## प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्रमोदी अद्य अकथयत् यत् प्रसिद्धस्य कृषि-वैज्ञानिकस्य प्रोफेसर-एम्.एस्-स्वामीनाथनस्य असाधारण कार्याणां आधरे एव भारतम् अद्य खाद्यान्नपूर्ते अपचिते: आत्मनिर्भरराष्ट्रं जातम्। स्वकीये अन्तर्जालसन्देशे इत्यत्र प्रधानमन्त्री स्वामीनाथनं स्मारितवान् तेनोक्तं यदा राष्ट्र खाद्यान्न-न्यूनताम् अकलोकयन् आसीत् तदा narendramodi.com स्वीमानाथनस्य प्रतिबद्धता दूरदर्शिता च देशं संकटात् बहि: कृतवत्यौ। गोधूम क्षेत्रे स्वामीनाथनस्य कार्येण गोधूमोत्पादन-क्षेत्रे वृद्धि जाता।

## इलराइल-फलिस्तान

फलस्तीन इत्येवस्य हमास-योहदृभि: अद्य गाजा-पट्टिाकात: योद्धृ-प्रक्षेपणानन्तरं इजराइलदेशेन युद्ध-सादृशी स्थिति: समुद्घोषिता। हमास इत्यनेन दक्षिणीय-इजराइल-इत्यस्मिन् सहस्राधिकानि योद्धृ प्रक्षेपणशस्त्राणि प्रक्षेपितानि। आक्रमणमिदं विगतेषु वर्षेषु साम्प्रतं यावत् बृहतमम् अस्ति। वार्तानुसारं हमास इत्यस्य भुशुण्डि-धारका: इजराइल क्षेत्रे प्रविश्य महिलाया: अवधं कृतवान्। पञ्चदशजना: व्रणिता: जाता:। सम्पूर्ण-इजराइल क्षेत्रे युद्धक-विमानानां संचेतना-ध्वनि: भवति। इजराइलस्य सेना स्पष्टीकृतं यत् सीमानम् समीपम् अनेकेषु स्थानेषु अवैध प्रवेशं जातम्। इजराइल-सेनया प्रत्युत्तरे-कार्याचरणं समारब्धम। प्रधानमन्त्री विन्जामिन-नेतन्याहू: शीर्ष-सुरक्षा धिकारिणाम् आपदुपवेशनं आकारितावान्। इजराइलस्य सुरक्षा-मन्त्रिमण्डलस्य अद्य मध्याह्नान्तरं राजघान्याम् तल-अवीन-इत्यस्मिन् सैन्य-मख्यालये उपवेशनं भवति। प्रधानमन्त्रिण: कार्यालयेन संसूचितं यत् देशे सुरक्षा स्थिति: समाकलने प्रचलति। घटनासु अस्मिन् वर्षे इजराइल-सेनया प्रायश: द्विशतं फलस्तीन-जना: मारिता:।

## आई सी सी

आई सी सी इति पुरूषस्य क्रिकेट-विश्व-चषक-प्रतिस्पर्धायां अद्य धर्मशालायां बांग्लादेशेन-अफगानिस्तानदेश: षड्-धावनांकै: पराजित:। द्वितीया प्रतिस्पर्धा नवदिल्ल्या: अरूणजेटली क्रीडांगणे दक्षिणाफ्रीका-श्रीलंका-देशयोर्मध्ये प्रचलति।

।। इति वार्ता: ।।